E93N6VU

# सङ्कलनात्मकं मूल्याङ्कनम् – I (2014-15)

## संस्कृतम् – सम्प्रेषणात्मकम्

## कक्षा – नवमी

**समय : होरात्रयम्** **पूर्णाङ्काः 90**

**निर्देशाः**

(i) प्रश्नपत्रे **चत्वारः खण्डाः** सन्ति।

खण्डः (क) अपठित-अवबोधनम् – **10 अङ्काः**

खण्डः (ख) रचनात्मक-कार्यम् – **15 अङ्काः**

खण्डः (ग) अनुप्रयुक्त-व्याकरणम् – **30 अङ्काः**

खण्डः (घ) पठित-अवबोधनम् – **35 अङ्काः**

(ii) सर्वे प्रश्नाः **अनिवार्याः।**

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यमेव लेखनीया।

(v) उत्तराणि संस्कृतेनैव लेखनीयानि।

## खण्ड : 'क'

## अपठित-अवबोधनम् – ( 10 अङ्काः )

1 **अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत –** 10

विद्यायाः महिमा विचित्रो वर्तते। विद्याधनं सर्वधनप्रधानम् अस्ति। अन्ये सर्वाणि धनानि तु व्यये कृते क्षीणानि जायन्ते परं विद्याधनं व्यये कृते अपि वर्धते। यदा जनाः विद्यां वितरन्ति, तदा तेषां विद्या वृद्धिं गच्छति। विद्याधनम् ईदृशं धनम् अस्ति यत् न तु चौरः अपहर्तुं शक्नोति न च राजशक्त्या तस्य हरणं जायते। विद्यया जनाः अपूर्वं सुखं लभन्ते। विद्या जनेभ्यः विनयं ददाति। तस्मात् विनयात् जनः पात्रत्वम् आप्नोति। पात्रत्वात् सः धनं प्राप्नोति, तदा धनात् धर्मं लभते। धर्मात् नरः सुखी भवति।

**I. एकपदेन उत्तरत।**

(i) कस्याः महिमा विचित्रो वर्तते?

(ii) विद्यया जनाः अन्ते किम् लभन्ते?

**II. पूर्णवाक्येन उत्तरत।**

(i) विद्याधनम् कीदृशं धनम् अस्ति?

(ii) विद्याधनं केन वर्धते?

**III. यथानिर्देशम् उत्तरत –**

(i) लभन्ते इति क्रियायाः कर्तृपदम् किम्?

(क) विद्यया (ख) जनाः

(ग) अपूर्व (घ) सुखम्

(ii) विनम्रता इति पदस्य अत्र किं पर्यायपदम्?

(क) प्रधाना (ख) विनयम्

(ग) विद्यया (घ) अपूर्वम्

(iii) सञ्चये इति पदस्य अत्र किं विलोमपदम्?

(क) वर्धते (ख) धनं

(ग) व्यये (घ) प्राप्नोति

(iv) सुखं – अस्य पदस्य विशेषणं किम्?

(क) विद्यया (ख) जनाः

(ग) लभन्ते (घ) अपूर्वं

**IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।**

## खण्डः 'ख'

## रचनात्मकं-कार्यम् – ( 15 अङ्काः )

2 **भवान् अर्णवः। भवता स्वमित्रं सिद्धान्तं प्रति परीक्षायां सफलतायै वर्धापनार्थं लिखितं पत्रं मञ्जूषायां प्रदत्तपदैः पूरयत उत्तरपुस्तिकायां च लिखत।** 5

परीक्षा भवनम्

दिल्लीतः


तिथि : ...

प्रिय सिद्धान्त!

__(i)__

अत्र कुशलं तत्रास्तु। __(ii)__परीक्षायाः सफलतायाः पत्रम् अधुनैव (iii)__। भवतः परीक्षापरिणामं ज्ञात्वा अति __(iv)__अभवत्। अहर्निशं प्रयासं कृत्वा भवान् 95 प्रतिशतं (v)__लब्धवान्। त्वं मम परिवारस्य__(vi) अर्हसि। पत्रे __(vii)__पुनः वर्धापनं__(viii)__। __(ix)__सादरं नमः।

भवतः __(x)__ ।

| | | | |
|---|---|---|---|
| | | अर्णव :<br><br>**मञ्जूषा**<br>संतोषः, पितृभ्याम्, अङ्कान्, भवतः, कामये, साधुवादान्, तुभ्यम्, प्राप्तम्, सप्रेम नमस्ते, मित्रम् | |
| | 3 | **मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतेन लिखत।**<br><br>**मञ्जूषा**<br>शोभनानि, खगाः, करोति, उद्यानम्, वृद्धः, व्यायामं, पिबन्ति, पुष्पाणि, हरीतिमा, विकसन्ति, विशालम्, तरन्ति, दण्डेन, जले, पश्यामः | 10 |
| | | **अथवा** | |
| | | **मञ्जूषायां प्रदत्तशब्दानाम् सहायतया 'नौकाचालनप्रतियोगिता' इति विषयम् अधिकृत्य पञ्चवाक्यानि संस्कृतेन लिखत।**<br>**मञ्जूषा**<br>दक्षिण–भारते, केरलप्रदेशे, अनेकेजनाः, नदीतीरे, एकत्रिताः, द्रष्टुं, प्रसिद्धा, भवन्ति, करतलध्वनिं, उत्साहवर्धनं, कुर्वन्ति, पुरस्काराः, हर्षः | 10 |
| | | **खण्डः 'ग'**<br>**अनुप्रयुक्त व्याकरणम् – ( 30 अङ्काः )** | |
| | 4 | **अधोलिखितप्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत –** | 4 |

(i) ॠ – वर्णस्य उच्चारणस्थानम् लिखत।

(ii) उच्चारणम् – इति पदे नासिक्यं वर्णं लिखत।

**रिक्तस्थानं पूरयत –**

(iii) प् + उ + र् + उ + ष् + ए + ण् + अ = __________

(iv) अस्माकम् – अ + __________ + म् + आ + क् + अ + म्

5 **अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं सन्धिं विच्छेदं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत –** 5

(i) मम मित्रम् तत्रैव आगमिष्यति।

(अ) तत्रा + एव (ब) तत्र + एव

(स) तत्र + ऐव (द) तत् + एव

(ii) अद्याहम् मित्रेण सह शुक्रतालं गतवान्।

(अ) अद्या + अहम् (ब) अद्य + आहम्

(स) अदि + अहम् (द) अद्य + अहम्

(iii) रमा — सुमेधे, नमः + त।

(अ) नमष्ते (ब) नमर्ते (स) नमस्ते (द) नमश्ते

(iv) जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।

(अ) स्वर्गाद् + पि (ब) स्वर्गात् + पि

(स) स्वर्गाद् + अपि (द) स्वर्गात् +अपि

(v) तरुच्छाया सुघना अस्ति।

(अ) तरु + छाया (ब) तरुच् + छाया

(स) तरुः + छाया (द) तरुत् + छाया

6 **उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत –** 5

(i) प्रातः __________ प्रकाशः तमः नाशयति।

(अ) रविः (ब) रविना (स) रवेः (द) रवौ

(ii) चन्द्रमाः __________ प्रकाशं लभते।

(अ) भानुम् (ब) भानोः (स) भानो (द) भानुः

(iii) वृक्षेषु सुन्दराणि पुष्पाणि मधुराणि__________ च उद्भवन्ति।

(अ) फलानाम् (ब) फलेभ्यः

(स) फलैः (द) फलानि

| | | |
|---|---|---|
| | (iv) __________गृहे कोऽपि न वसति।<br>(अ) अस्मात् (ब) अस्य (स) अस्मिन् (द) अनेन<br>(v) __________ अध्यापिका अस्ति।<br>(अ) लता (ब) लताम् (स) लताया (द) लताया: | |
| 7 | **अधोलिखितविकल्पेभ्य: धातो: उचितं रूपं चित्वा रिक्तस्थानं पूरयत –**<br>(i) देशभक्ता: वीरा: एव सुखं _______।<br>(अ) लभन्ते (ब) लभेते<br>(स) लभते (द) लभामहे<br>(ii) छात्रौ गुरुम् _______।<br>(अ) असेवत (ब) असेवन्त<br>(स) असेवेताम् (द) असेवथा:<br>(iii) रचना अतिथिभ्य: भोजनं_______।<br>(अ) पक्ष्यति (ब) पक्ष्यामि<br>(स) पक्ष्यसि (द) पक्ष्यन्ति<br>(iv) जनक: पुत्रीभ्याम् फलानि_______।<br>(अ) आनयत: (ब) आनयन्ति<br>(स) आनयति (द) आनयसि<br>(v) भक्ता: देवालये ईश्वरम् _______ ।<br>(अ) अनमत् (ब) अनम:<br>(स) अनमाम (द) अनमन् | 5 |
| 8 | **कोष्ठगतशब्देषु उचितविभक्तिं प्रयुज्य वाक्यानि पूरयत।**<br>(i) (नदी) _______ उभयत: वृक्षा: शोभन्ते।<br>(ii) छात्रा: (कक्षा) _______ बहि: कोलाहलं कुर्वन्ति।<br>(iii) (भोजन) _______ पूर्वम् हस्तौ अवश्यं प्रक्षालय।<br>(iv) स: कण्व: तु _______ कुशल: अस्ति। (नर्त्तन)<br>(v) देव्यै _______ नम:। (सरस्वती) | 5 |
| 9 | **( क ) अधोलिखितवाक्येषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा रिक्तस्थानपूर्तिम् कृत्वा वाक्यानि पुन: लिखत।**<br>(i) मित्रम् रुग्णावस्थायाम् (दृश+कत्वा) ___________अहम् अतीव दु:खी अभवम्।<br>(ii) लुब्ध: नर: सन्मार्गम् (त्यज् + तुमुन्) ___________ उद्यत: भवति।<br>(iii) छात्र: कक्षाया: (निर् + गम् + ल्यप्) ___________उद्यानं गच्छति। | 6 |

| | | | |
|---|---|---|---|
| | | (i) श्वेतकेतुः वेदान् (अधीत्य) ____ गृहम् प्रत्यागच्छत्।<br>(ii) साधुः गङ्गायाम् (स्नात्वा) ____ देवालयम् गच्छति।<br>(iii) शुकः फलम् (खादितुम्) ____ वृक्षे तिष्ठति। | |
| | | **खण्ड : 'घ'**<br>**पठित–अवबोधनम् – 35 अङ्काः** | |
| | 10 | **अधोलिखितम् गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।**<br>अत्रान्तरे ब्राह्मणोऽपि श्राद्धं गृहीत्वा गृहम् उपावृत्तः। ब्राह्मणं दृष्ट्वा नकुलः रक्तविलिप्तमुखपादः तस्य चरणयोः अलुठत्। विप्रः तथाविधं तं दृष्ट्वा बालकोऽनेन खादितः इति अवधार्य कोपात् नकुलं व्यापादितवान्। अनन्तरं यावत् उपसृत्य अपत्यं पश्यति तावद् बालकः सुस्थः सर्पश्च व्यापादितः तिष्ठति। ततः तम् उपकारकं नकुलं मृतं निरीक्ष्य आत्मानं मुषितं मन्यमानः ब्राह्मणः परं विषादम् अगच्छत्।<br>**I. एकपदेन उत्तरत।**<br>(i) नकुलेन कः व्यापादितः?<br>(ii) रक्तविलिप्तमुखपादः नकुलः कृतज्ञतया कस्य चरणयोः अलुठत्?<br>**II. पूर्णवाक्येन उत्तरत।**<br>ब्राह्मणः नकुलं किमर्थम् व्यापादितवान्?<br>**III. उचितम् उत्तरम् चित्वा लिखत –**<br>(i) 'उपकारकम्' इति पदस्य विशेष्यपदम् अनुच्छेदे किम्?<br>(अ) ब्राह्मणं (ब) सर्पम् (स) नकुलम् (द) बालकम्<br>(ii) 'समीपं गत्वा' इत्यर्थे गद्यांशे किम् पदम्अस्ति?<br>(अ) अवधार्य (ब) निरीक्ष्य (स) गृहीत्वा (द) उपसृत्य | 5 |
| | 11 | **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत –**<br>भवन्ति नम्रास्तरवः फलोद्गमैः नवाम्बुभिर्भूरिविलम्बिनो घनाः।<br>अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम्।।<br>**(I) एकपदेन उत्तरत।**<br>(i) तरवः कथं नम्राः भवन्ति?<br>(ii) सत्पुरुषाः काभिः अनुद्धताः भवन्ति?<br>**(II) पूर्णवाक्येन उत्तरत।**<br>घनाः कथं नम्राः भवन्ति?<br>**(III) यथानिर्देशम् उत्तरत –**<br>(i) 'भवन्ति' इति क्रियापदस्य कर्तृपदं एतेषु किम्? | 5 |

| | | | |
|---|---|---|---|
| | | (अ) नम्राः (ब) परोपकारिणाम्<br>(स) तरवः (द) फलोद्गमैः<br>(ii) 'उद्धतस्वभावाः' इत्यस्य विपरीतार्थकं पदं किम्?<br>(अ) अनुद्धताः (ब) घनाः<br>(स) नम्रास्तरवः (द) समृद्धिभिः | |
| 12 | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत —**<br>आरूणिः - श्वेतकेतो! न्यग्रोधफलमाहर!<br>श्वेतकेतुः - इदं भगवन् !<br>आरूणिः - भिन्धि!<br>श्वेतकेतुः - भिन्नं भगवन्।<br>आरूणिः - किमत्र पश्यसि?<br>श्वेतकेतुः - अणुतराणि इमानि बीजानि।<br>आरूणिः - एषु एकं बीजं भिन्धि।<br>श्वेतकेतुः - भिन्नम्।<br>आरूणिः - किमत्र पश्यसि?<br>श्वेतकेतुः - न किञ्चन् भगवन्।<br>**I. एकपदेन उत्तरत।**<br>(i) 'भगवन्' इति कथयित्वा श्वेतकेतुः कं सम्बोधयति?<br>(ii) आरूणिः श्वेतकेतुं किं आनेतुम् कथयति?<br>**II. पूर्णवाक्येन उत्तरत।**<br>श्वेतकेतुः फले किम् पश्यति?<br>**III. उचितम् उत्तरं चित्वा लिखत—**<br>(i) 'आनय' अस्मिन् अर्थे किं क्रियापदम् अत्र प्रयुक्तम्?<br>(अ) आहर (ब) भिन्धि (स) पश्यसि (द) न किमपि<br>(ii) अत्र 'भिन्धि' क्रियापदस्य कर्तृपदम् किम्।<br>(अ) (त्वम्) आरुणिः (ब) न्यग्रोधफलम्<br>(स) बीजम् (द) (त्वम्) श्वेतकेतुः | | 5 |
| 13 | **अधोलिखितपंक्त्योः उचितं भावार्थम् चित्वा उत्तरपुस्तिकायां लिखत।**<br>**(अ)** (i) क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम्।<br>(अ) कालः कार्यस्य आनन्दं नाशयति।<br>(ब) विलम्बेन कृतस्य कार्यस्य आनन्दः स्वयमेव नश्यति।<br>(स) कार्यस्य स्वादः न्यूनः भवति।<br>(ii) मार्गारब्धाः सर्वयत्नाः फलन्ति। | | 4 |

| | | | |
|---|---|---|---|
| | | (अ) मार्गे दैवयोगेन सर्वे यत्नाः फलन्ति।<br>(ब) आरम्भे सर्वे यत्नाः मार्गे फलदायकाः भवन्ति।<br>(स) ताः एव चेष्टाः फलदायिकाः भवन्ति याः उचितमार्गे सोद्देश्यं प्रारभ्यन्ते।<br>**( आ ) अधोलिखितपंक्त्योः भावार्थम् मञ्जूषायाः सहायतया पूरयित्वा उत्तरपुस्तिकायां लिखत** –<br>(1) गौरवं प्राप्यते दानात् न तु वित्तस्य संचयात्।<br>**भावः**– अस्मिन् लोके जनाः सदैव __(i)__ गौरवं प्राप्नुवन्ति धनस्य संग्रहकारणात् कदापि __(ii)__ ।<br>(2) काले हित–मित मधुरार्थवादी स्यात्।<br>**भावः**– सः एव जनः सम्मानं प्राप्नोति, यः उचिते__(iii)__ हितकारि वचनं वदेत्, __(iv)__ मधुरं च वचनं वदेत्।<br><br>**मञ्जूषा**<br>सञ्चयात्, स्थाने, संक्षिप्तम्, दानात्, न, एव, स्पष्टम्, काले | |
| | 14 | **अधोलिखितपद्यद्वयस्य अन्वययोः रिक्तस्थानानि मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत।**<br>**( क )** सुचिरेणापि कालेन यशः किञ्चिन्मयार्जितम्।<br>अचिरेणैव कालेन भरतेनाद्य सञ्चितम्।।<br>**अन्वयः** – मया सुचिरेण अपि __(i)__ किञ्चित् यशः __(ii)__ अद्य भरतेन __(iii)__ एव कालेन (तत्) __(iv)__ ।<br>**( ख )** सद्भिस्तु लीलया प्रोक्तं शिलालिखितमक्षरम्।<br>असद्भिः शपथेनापि जले लिखितमक्षरम्।<br>**अन्वयः** – सद्भिः तु __(v)__ (एव) प्रोक्तं __(vi)__ अक्षरम् (इव भवति)। __(vii)__ शपथेन अपि (प्रोक्तम्) जले __(viii)__ अक्षरम् (इव भवति)।<br>**मञ्जूषा**<br>अर्जितम्, असद्भिः, कालेन, लीलया, लिखितम्, अचिरेण, शिलालिखितम्, सञ्चितम् | 4 |
| | 15 | **निम्नलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत —**<br>(i) श्वेतकेतुः सर्वान् वेदान् सार्थान् अधीत्य <u>पितुः</u> समीपम् आगच्छत्।<br>(ii) तं पुत्रं <u>पिता आरुणिः</u> उवाच।<br>(iii) <u>उज्जयिन्याम्</u> एकः विप्रः अवसत्।<br>(iv) <u>नकुलेन</u> कृष्णसर्पः दृष्टः। | 4 |

| | | | |
|---|---|---|---|
| | 16 | **कथाक्रमानुसारम् अधोलिखितवाक्यानि क्रमेणपुनः लिखत।**<br>(i) राजानिजपुत्रान् विष्णुशर्मणः करेसमर्पितवान्।<br>(ii) विष्णुशर्माबृहस्पतिः इव आसीत्।<br>(iii) राजापण्डितसभां कारितवान्।<br>(iv) सुदर्शनःपृच्छति – कश्चित् विद्वान् अस्ति यः मम पुत्रान् शिक्षयितुं समर्थः।<br>(v) भागीरथीतीरेपाटलिपुत्रनामधेयं नगरम् आसीत्।<br>(vi) यतः विद्याहीनाःनिर्गन्धाः किंशुका इव न शोभन्ते।<br>(vii) राजापुत्रान् दृष्ट्वाचिन्तितःभवति।<br>(viii) तत्रसुदर्शनःनाम राजा आसीत्। | 4 |
| | 17 | **(I) प्रसङ्गानुसारं रेखाङ्कितपदयोः उचितम् अर्थं चित्वा लिखत –**<br>(i) कः ते <u>उपाध्यायात्</u> अतिशयः प्राप्तः ?<br>(अ) आचार्यात् (ब) अकस्मात्<br>(स) विलम्बात् (द) धनात्<br>(ii) न <u>अहंमानी</u> स्यात्।<br>(अ) कार्याणि (ब) स्वाभिमानी<br>(स) सम्भवानी (द) अहंकारी<br>**(II) शब्दानाम् अर्थैः सह मेलनं कुरुत**<br>(i) सहसा प्रणमामि<br>(ii) पण्डितैः सन्ततेः<br>(iii) अभिवादये अविचार्य<br>(iv) अपत्यस्य विद्वद्भिः | 4 |
| | | | |
| | | | |